✧˖°*❋ ❋*°˖✧

# श्री सिद्धिविनायक स्तोत्रम्
# (Shri Siddhivinayak Stotram)

✧˖°*❋ ❋*°˖✧

# ॥ श्री सिद्धिविनायक स्तोत्रम् ॥

विघ्नेश विघ्नचयखण्डननामधेय
श्रीशंकरात्मज सुराधिपवन्द्यपाद ।
दुर्गामहाव्रतफलाखिलमंगलात्मन्
विघ्नं ममापहर सिद्धिविनायक त्वम् ॥1॥

सत्पद्मरागमणिवर्णशरीरकान्ति:
श्रीसिद्धिबुद्धिपरिचर्चितकुंकुमश्री: ।
दक्षस्तने वलयितातिमनोज्ञशुण्डो
विघ्नं ममापहर सिद्धिविनायक त्वम् ॥2॥

पाशांकुशाब्जपरशूंश्च दधच्चतुर्भि-
र्दोर्भिश्च शोणकुसुमस्त्रगुमांगजात: ।
सिन्दूरशोभितललाटविधुप्रकाशो
विघ्नं ममापहर सिद्धिविनायक त्वम् ॥3॥

कार्येषु विघ्नचयभीतविरंचिमुख्यै:
सम्पूजित: सुरवरैरपि मोदकाद्यै: ।
सर्वेषु च प्रथममेव सुरेषु पूज्यो
विघ्नं ममापहर सिद्धिविनायक त्वम् ॥4॥

शीघ्रांचनस्खलनतुंगरवोर्ध्वकण्ठ-
स्थूलेन्दुरुद्रगणहासितदेवसंघ: ।
शूर्पश्रुतिश्च पृथुवर्तुलतुंगतुन्दो
विघ्नं ममापहर सिद्धिविनायक त्वम् ॥5॥

यज्ञोपवीतपदलम्भितनागराजो
मासादिपुण्यददृशीकृतऋक्षराजः ।
भक्ताभयप्रद दयालय विघ्नराज
विघ्नं ममापहर सिद्धिविनायक त्वम् ॥6॥

सद्रत्नसारततिराजितसत्किरीटः
कौसुम्भचारुवसनद्वय ऊर्जितश्रीः।
सर्वत्र मंगलकरस्मरणप्रतापो
विघ्नं ममापहर सिद्धिविनायक त्वम् ॥7॥

देवान्तकाद्यसुरभीतसुरार्तिहर्ता
विज्ञानबोधनवरेण तमोऽपहर्ता ।
आनन्दितत्रिभुवनेश कुमारबन्धो
विघ्नं ममापहर सिद्धिविनायक त्वम् ॥8॥

॥इति विघ्ननिवारकं श्रीसिद्धिविनायकस्तोत्रं सम्पूर्णम् ॥

# ll Shree Siddhivinayak Stotram ll

Vighnesh Vighnachayakhandananamadheya
Shree Shankaratmaj Suradhipvandypad ll
Durgamahavrataphalakhilamangalatman
Vighnam Mamapahar Siddhivinayak Twam ll

Satpadmaragamanivarnasharirakanti:
Shree Siddhibuddhiparichchitakunkumashri: ll
Dakshastane valayitātimanojnyashundo
Vighnam Mamapahar Siddhivinayak Twam ll

Pashankushabjaparashumshcha dadhachchaturbhi-
rdorbhishcha shonakusumastragumāngajātah: ll
Sindoorashobhitalalatavidhuprakasho
Vighnam Mamapahar Siddhivinayak Twam ll

Kāryeshu Vighnachayabhītaviranchimukhyai:
Sampūjitah suravarairapi modakādyai: ll
Sarveshu cha prathamameva sureshu pūjyo
Vighnam Mamapahar Siddhivinayak Twam ll

Shīghranchanaskhalanatungaravordhvakantha-
sthulendurudragaṇahāsitadevasanghah: ll
Shurpashrutishcha prithuvartulatungatundo
Vighnam Mamapahar Siddhivinayak Twam ll

Yajnopavītapadalambhitānāgarājo
Māsādipuṇyadadṛśīkṛitṛikṣharājah: ll
Bhaktābhayaprad dayālaya Vighnarāj
Vighnam Mamapahar Siddhivinayak Twam ll

Sadratnasāratatirājit satkirīṭa:
Kausumbhachāruvasanadvaya ūrjitashrī: ||
Sarvatra maṅgalakarasmaraṇapratāpo
Vighnam Mamapahar Siddhivinayak Twam ||

Devāntakādyasurabhītasurārtihartā
Vijñānabodhanavareṇa tamohapahartā ||
Ānanditatribhuvaneś kumārabandho
Vighnam Mamapahar Siddhivinayak Twam ||

||Iti Vighnanivārakam Shree Siddhivināyakastotram Sampūrnam ||

✧ₓ┈┈°*❋ ❋*°┈┈ₓ✧

All types of mantra at: chalisapdf.net